Atma Bodhah

तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम्
मुमुक्षूणामपेक्ष्योऽयं आत्मबोधो विधीयते।। १ ।।
बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम्।
पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति।। २ ।।
अविरोधितया कर्म नाविद्यां विनिवर्तयेत्।
विद्याऽविद्यां निहंत्येव तेजस्तिमिरसंघवत्।। ३ ।।
परिच्छिन्न इवाज्ञानात्तन्नाशे सति केवलः।
स्वयं प्रकाशते ह्यात्मा मेघापायेंऽशुमानिव।। ४ ।।
अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलम्।
कृत्वा ज्ञानं स्वयं नश्येद् जलं कतकरेणुवत्।। ५ ।।
संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः।
स्वकाले सत्यवद्भाति प्रबोधे सत्यसद्भवेत्।। ६ ।।
तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा।
यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमद्वयम्।। ७ ।।
व्यक्तयो विविधास्सर्वाः हाटके कटकादिवत्।। ८ ।।
यथाकाशो हृषीकेशो नानोपाधिगतो विभुः।
तद्भेदाद्भिन्नवद्भाति तन्नाशे केवलो भवेत्।। ९ ।।
नानोपाधिवशादेव जातिनामाश्रमादयः।

आत्मन्यारोपितास्तोये रसवर्णादिभेदवत्।। १० ।।
पञ्चीकृतमहाभूतसंभवं कर्मसञ्चितम्।
शरीरं सुखदुःखानां भोगायतनमुच्यते।। ११
पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्।।१२
अनाद्यविद्यानिर्वाच्या कारणोपाधिरुच्यते।
उपाधित्रितयादन्यमात्मानमवधारयेत्।। १३ ।।
पञ्चकोशादियोगेन तत्तन्मय इव स्थितः।
शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा।। १४।।
वपुस्तुषादिभिः कोशैः युक्तं युक्त्यावघाततः।
आत्मानमान्तरं शुद्धं विविच्यात्तण्डुलं यथा।। १५
सदा सर्वगतोप्यात्मा न सर्वत्रावभासते।
बुद्धावेवाभासेत स्वच्छेषु प्रतिबिम्बवत्। १६
देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम्।
तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा।। १७
व्यापृतेष्विन्द्रियेष्वात्मा व्यापारीवाविवेकिनाम्।
दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी।। १८
आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः।
स्वकीयार्थेषु वर्त्तन्ते सूर्यालोकं यथा जनाः।। १९
देहेन्द्रियगुणान्कर्माण्यमले सच्चिदात्मनि।

अध्यस्यन्त्यविवेकेन गगने नीलतादिवत्। २०
अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि।
कल्प्यन्तेऽम्बुगते चन्द्रे चलनादि यथाऽम्भसः।। २१
रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्त्तते।
सुषुप्तौ नास्ति तन्नाशे तस्माद् बुद्धेस्तु नात्मनः।। २२
प्रकाशोऽर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता।
स्वभावस्सच्चिदानन्दनित्यनिर्मलतात्मनः।। २३
आत्मनस्सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्वयम्।
संयोज्य चाविवेकेन जानामीति प्रवर्त्तते। २४
आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्वपि।
जीवस्सर्वमलं ज्ञात्वा ज्ञाता द्रष्टेति मुह्यति। २५
रज्जुसर्पवदात्मानं जीवं ज्ञात्वा भयं वहेत्।
नाहं जीवः परात्मेति ज्ञातश्चेन्निर्भयो भवेत्।। २६
आत्मावभासयत्येको बुद्ध्यादीनीन्द्रियाणि हि।
दीपो घटादिवत्स्वात्मा जडैस्तैर्नावभास्यते।। २७
स्वबोधे नान्यबोधेच्छा बोधरूपतयात्मनः।
न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने।। २८
निषिध्य सकलोपाधीन् नेति नेतीति वाक्यतः।
विद्यादैक्यं महावाक्यैः जीवात्मपरमात्मनोः।। २९
आविद्यकं शरीरादि दृश्यं बुद्बुदवत्क्षरम्।

एतद्विलक्षणं विद्याद् अहं ब्रह्मेति निर्मलम्।। ३०
देहान्यत्वान्न मे जन्मजराकार्श्यलयादयः।
शब्दादिविषयैः सङ्गो निरिन्द्रियतया न च।। ३१
अमनस्त्वान्न मे दुःखरागद्वेषभयादयः।
अप्राणो ह्यमनाश्शुभ्र इत्यादिश्रुतिशासनात्।। ३२
निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरञ्जनः।
निर्विकारो निराकारो नित्यमुक्तोऽस्मि निर्मलः।। ३३
अहमाकाशवत्सर्वं बहिरन्तर्गतोऽच्युतः।
सदा सर्वसमश्शुद्धो निस्सङ्गो निर्मलोऽचलः।। ३४
नित्यशूद्धविमुक्तैकमखण्डानन्दमद्वयम्।
सत्यं ज्ञानमनन्तं यत् परब्रह्माहमेव तत्। ३५
एवं निरन्तरकृता ब्रह्मैवास्मीति वासना।
हरत्यविद्याविक्षेपान् रोगानिव रसायनम्।। ३६
विविक्तदेश आसीनो विरागो विजितेन्द्रियः।
भावयेदेकमात्मानं तमनन्तमनन्यधीः।। ३७
आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः।
भावयेदेकमात्मानं निर्मलाकाशवत् सदा।। ३८
रूपवर्णादिकं सर्वं विहाय परमार्थवित्।
परिपूर्णचिदानन्दस्वरूपेणावतिष्ठते।। ३९
ज्ञातृज्ञानज्ञेयभेदः परमात्मनि न विद्यते।

चिदानन्दैकरूपत्वाद्दीप्यते स्वयमेव तत्। ४०
एवमात्मारणौ ध्यानमथने सततं कृते।
उदितावगतिज्वाला सर्वाज्ञानेन्धनं दहेत् ।। ४१ ।।
अरुणेनेव बोधेन पूर्वं सन्तमसे हृते।
तत आविर्भवेदात्मा स्वयमेवांशुमानिव।। ४२
आत्मा तु सततं प्राप्तो ह्यप्राप्तवदविद्यया।
तन्नाशे प्राप्तवद्भाति स्वकण्ठाभरणं यथा।। ४३
स्थाणौ पुरुषवद्भ्रान्त्या कृता ब्रह्मणि जीवता।
जीवस्य तात्विके रूपे तस्मिन् दृष्टे निवर्त्तते।। ४४
तत्वस्वरूपानुभवादुत्पन्नं ज्ञानमञ्जसा
अहंममेति चाज्ञानं बाधते दिग्भ्रमादिवत्।। ४५ ।।
सम्यग्विज्ञानवान् योगी स्वात्मन्येवाखिलं स्थितं।
एकञ्च सर्वमात्मानं ईक्षते ज्ञानचक्षुषा।। ४६
आत्मैवेदं जगत्सर्वं आत्मनोऽन्यन्न किञ्चन।
मृदो यथा घटादीनि स्वात्मानं सर्वमीक्षते।। ४७
जीवन्मुक्तस्तु तद्विद्वान् पूर्वौपाधिगुणांस्त्यजेत्।
स सच्चिदादिधर्मत्वं भेजे (भवेत् वा) भ्रमरकीटवत्।। ४८
तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान्।
योगी शान्तिसमायुक्तः आत्मारामो विराजते।। ४९
बाह्यानित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः।

घटस्थदीपवच्छश्वदन्तरेव प्रकाशते।। ५०
उपाधिस्थोऽपि तद्धर्मैर्न लिप्तो व्योमवन्मुनिः।
सर्वविन्मूढवत्तिष्ठेदसक्तो वायुवच्चरेत्।। ५१
उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः।
जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथा।। ५२
यल्लाभान्न परो लाभो यत्सुखान्न परं सुखम्।
यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत्।। ५३
यद्दृष्ट्वा न परं दृश्यं यद्भूत्वा न पुनर्भवः।
यज्ज्ञात्वा न परं ज्ञेयं तद्ब्रह्मेत्यवधारयेत्।। ५४
तिर्यगूर्ध्वमधः पूर्णं सच्चिदानन्दमद्वयम्।
अनन्तं नित्यमेकं यत् तद्ब्रह्मेत्यवधारयेत्।। ५५
अतद्व्यावृत्तिभेदैस्तु वेदान्तैर्लक्ष्यतेऽव्ययम्।
अखण्डानन्दमेकं यत् तद्ब्रह्मेत्यवधारयेत्।। ५६
अखण्डानन्दरूपस्य तस्यानन्दलवाश्रिताः।
ब्रह्माद्यास्तारतम्येन भवन्त्यानन्दिनोऽखिलाः।। ५७
तद्युक्तमखिलं वस्तु व्यवहारश्चिदन्वितः।
तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले।। ५८
अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययम्।
अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत्।। ५९
यद्भासा भास्यतेऽर्कादि भास्यैर्यत्तु न भास्यते।

येन सर्वमिदं भाति तद्ब्रह्मेत्यवधारयेत्।। ६०
न तद्भासयते सूर्यो न शशांको न पावकः ।
यद्गत्वा न निवर्त्तन्ते तद्धाम परमं ममेति।। ६१
स्वयमन्तर्बहिर्व्याप्य भासयन्नखिलं जगत्।
ब्रह्म प्रकाशते वह्निप्रतप्तायसपिण्डवत्।। ६२
जगद्विलक्षणं ब्रह्म ब्रह्मणोऽन्यन्न किञ्चन।
ब्रह्मान्यदस्ति चेन्मिथ्या यथा मरुमरीचिका।। ६३
दृश्यते श्रूयते यद्यत् ब्रह्मणोऽन्यन्न तद्भवेत्।
तत्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम्। ६४
सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते।
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत्।। ६५
श्रवणादिभिरुद्दीप्तज्ञानाग्निपरितापितः।
जीवस्सर्वमलान्मुक्तः स्वर्णवद्दृश्यते स्वयम्।। ६६
हृदाकाशोदितो ह्यात्मा बोधभानुस्तमोपहृत्।
सर्वव्यापी सर्वधारी भाति भासयतेऽखिलम्।। ६७
दिग्देशकालाद्यनवेक्ष्य सर्वगं
शीतादिहृन्नित्यसुखं निरञ्जनम्।
यः स्वात्मतीर्थं भजते विनिष्क्रियः
स सर्ववित्सर्वगतोऽमृतो भवेत्। ६८